द्वादशः पाठः

## आदिकविः वाल्मीकिः



पुरा वाल्मीकिः नाम एकः ऋषिः आसीत्। एकदा सः शिष्यैः सह स्नातुं तमसानद्याः तीरम् अगच्छत्।

मार्गे सः व्याधेन विद्धम् एकं क्रौ चपक्षिणमपश्यत्। सहचरस्य वियोगेन व्याकुलितायाः क्रौ च्याः उच्चैः क्रन्दनम् अशृणोत्। तत् श्रुत्वा तस्याः दयनीयां दशां दृष्ट्वा कारुणिकः ऋषिः द्रवितोऽभवत्। क्रौ चीक्रन्दनात् जातः ऋषेः शोकः श्लोकरूपेण तस्य मुखात् एवं निरगच्छत्-मा निषाद

!

ऋषेः कवित्वं विज्ञाय ब्रह्मा आकाशवाण्या आदिशत्- ''ऋषे! कुरु रामायणं काव्यम्। तत्र च रामचरितं वर्णय, येन रामस्य पुण्यं चरित्रं विदित्वा लोकाः सन्मार्गस्यानुसरणं कुर्युः।''

ब्रह्मणः आदेशानुसारेण वाल्मीकिना श्लोकबद्धा रामायणीकथा लिखिता। सैव वाल्मीकीयरामायणनाम्ना प्रसिद्धा।

अस्मिन् काव्ये वाल्मीकिना पितुः आज्ञापालनम् , भ्रातृस्नेहः, परोपकारः, दया, दाक्षिण्यम्, दीनरक्षा इत्यादीनि मानवतायाः पोषकानि जीवनमूल्यानि वर्णितानि सन्ति। अयं कविः संस्कृतस्य आदिकविः उच्यते तद्रचना च आदिकाव्यम् उच्यते।

### शब्दार्थः

**व्याधेन** = बहेलिया द्वारा। **क्रौञ्चपक्षिणम्** = क्रौञ्च नामक पक्षी को। **उच्चैः** = जोर-जोर से। **क्रन्दनम्** = विलाप को, चीख़ को। **कारुणिकः** = दयालु। निषाद! = हे व्याध। **प्रतिष्ठाम्** = सम्मान। **ततः प्रभृति** = से लेकर। **विज्ञाय** = जानकर। **विदित्वा** = जानकर। **दाक्षिण्यम्** = उदारता, अनुकूलता। **जीवनमूल्यानि** = आदर्श जीवन के मूल्य।

### अभ्यासः

**1. उच्चारणं कुरुत पुस्तिकायां च लिखत-**

तमसानद्याः व्याकुलितायाः का चीक्रन्दनात्

यत्कौञ्चमिथुनादेकम् सन्मार्गस्यानुसरणम् दाक्षिण्यम्

**2. पूर्णवाक्येन उत्तरत-**

(क) वाल्मीकिः स्नातुं कुत्र अगच्छत् ?

(ख) किं श्रुत्वा किं दृष्ट्वा च ऋषिः द्रवितोऽभवत् ?

(ग) ब्रह्मा आकाशवाण्या वाल्मीकिं किम् आदिशत् ?

(घ) वाल्मीकिना श्लोकबद्धा का कथा लिखिता ?

(ङ) संस्कृतस्य आदिकविः कः ?

**3. निम्नलिखितपदानां विभक्तिं वचनं च लिखत-**

पदम् विभक्तिः वचनम्

शिष्यैः .................. ..................

नदीम् .................. ..................

जीवने .................. ..................

रामस्य .................. ..................

**4. निम्नलिखितपदेषु प्रयुक्तं उपसर्गं पृथक् कुरुत-**

पदम् उपसर्ग: शब्दः

वियोगेन .................. ..................

अनुकरणम् ................... ..................

अपमानम् .................. ..................

आहारः .................. ..................

**5. संस्कृतभाषायाम् अनुवादं कुरुत-**

(क) सभी छात्र स्नान करने के लिए नदी के किनारे गये।

(ख) वाल्मीकीयरामायण में राम का चरित वर्णित है।

(ग) वाल्मीकि ऋषि ने क्रौञ्ची का रोना सुना।

(घ) ब्रह्मा ने वाल्मीकि को आदेश दिया।

(ङ) महापुरुषों के चरित्र का अनुसरण करो।

**6. म×जूषातः पदानि चित्वा वाक्यानि पूरयत -**

कविपदम् ऋषिः क्रा □चपक्षिणम् आदिकविः

(क) पुरा वाल्मीकिः नाम एकः............आसीत्।

(ख) व्याधेन विद्धम् एकं...............अपश्यत्।

(ग) ततः प्रभृति ऋषिरयं................प्राप्तः।

(घ) अयं कविः संस्कृतस्य ....................उच्यते।

**7. पदानि चित्वा कथां पूरयत-**

दुर्दान्तनामकः, मारयति स्म, बिडालकस्य, कृत्वा,

अनयत्, कर्तुम्, उपेक्षाम्, दुःखी, मूषकाः, समाप्ताः।

एकस्मिन् पर्वते...................... सिंहः निवसति स्म। सः मूषकैः पीडितः आसीत्। रात्रिकाले................तस्य केशान् कर्तयन्ति स्म। प्रातः सिंहः केशान् अधः दृष्ट्वा .............. भवति स्म। एकदा सः मूषकानाम् उपायम् ...... संकल्पम् अकरोत्। चिन्तामग्नः सः वने बिडालकम् अपश्यत्। बिडालकेन सह मित्रतां ................ स्वगुहां प्रति........... मूषकाः............भयेन विवरेषु केवलं शब्दं कुर्वन्ति स्म। यदा क्षुधापीडया मूषकाः बहिः आगच्छन्ति, तदा बिडालकः तान्..................। एवं शनैः-शनैः मूषकाः.............। स्वार्थे सिद्धे सिंहः विडालकस्य ............ अकरोत्। समाजे स्विार्थभिः सावधानाः भवेम।

शिक्षण-सङ्केतः

1. पाठस्य श्लोकार्थं लघुसमूहेषु लेखनस्य गतिविधिं कारयत।

2. कक्षायां पाठस्य वाचनं कारयत।

3. वाल्मीकिविषये दशवाक्यानि संस्कृतभाषायां लेखयत।

**जीवितं यः स्वयं चेच्छेत् कथं सोऽन्यं प्रघातयेत्।**